IJNRD.ORG ISSN : 2456-4184
INTERNATIONAL JOURNAL OF NOVEL RESEARCH AND DEVELOPMENT (IJNRD) | IJNRD.ORG
An International Open Access, Peer-reviewed, Refereed Journal

# अद्वैतवेदान्तदिशा प्रपञ्चसत्यत्वनिराकरणम्

**Sutapa Kar**
Research Scholar- Advaita Vedanta(2024)
NSU, Tirupati, A.P., 517507

अधुनाऽद्वैतवादिदिशा प्रपञ्चसत्यत्वनिराकरणं क्रियते। तथाहि - “सन् घट :” इत्यादिप्रत्यक्षेण न तावद्घटादिप्रपञ्चस्य सत्यत्वं सिद्ध्यति। तत्र घटादिगतं सत्त्वं विधिगम्यत्वम् , अर्थक्रियाकारित्वम्, प्रातिभासिकेतरत्वम्, असत्वातिरिक्तत्वम्, सत्ताजात्यादिमत्त्वं वा गृहीत्वा प्रपञ्चस्य सत्यत्वसाधनमकिञ्चित्करम्। अन्यत्तु तत्त्वमबाध्यत्वं कुत्र वा केन वा प्रमाणेनाधिगतम् ? यदि ब्रह्मण: “सत्यं ज्ञानम्" इत्यादिश्रुत्या, तर्हि तावता प्रपञ्चस्य ब्रह्मेतरस्य किमायातम् ? “अतोऽन्यदार्तम्” “विद्वान्नामरूपाद्विमुक्तः” इत्यादिश्रुत्या तदतिरिक्तस्यासत्त्वावगमात् तदसत्यत्वमेव श्रुत्याऽवसीयते। ब्रह्मणोऽबाध्यत्वं च सर्वाधिष्ठानत्वात्, तदधिष्ठानस्यान्यस्याभावात् तद्विवर्तत्वात्, तद्बाधकज्ञानाभावाच्च, तत्तु न तद्विपरीतस्य ब्रह्मेतरस्याध्यस्तैकस्वभावस्य, तदधिष्ठानसाक्षात्कारनिवर्त्यैकस्वभावस्य च। सति चैवमबाध्यत्वं यदि स्वाधिष्ठानसाक्षात्कारनिवर्त्यत्वरूपं विवक्ष्यते तर्हि घटादेरपि तदधिष्ठानसाक्षात्कारानिवर्त्यत्वं प्रत्यक्षेण गृह्यत इति वक्तव्यम्। तथा च स्वाधिष्ठानसाक्षात्काराबाध्यत्वं ब्रह्मणः इव घटादेरप्यधिष्ठानाभावे शशशृङ्गादिभ्यो विशेषे कारणाभावात् सत्त्वेनोक्तविधेन जगत: प्रतीतिरनुपपन्ना, इति शशशृङ्गादीनामिव सत्त्वप्रत्यक्षमेवात्र बाधितम्। अपि च सत्तासामान्यादिरूपं पारिभाषिकं सत्त्वं न मिथ्यात्वस्य विरोधीति अन्यैरपि अङ्गीकृतमिति न “सन् घट:” इत्यादिप्रत्यक्षेण घटादेर्मिथ्यात्वस्य बाधोऽपि तु मिथ्यात्वमभिप्रेत्यायं प्रत्यक्षबाध इति वक्तव्यम्। मिथ्यात्वञ्च यदि सदसद्विलक्षणत्वमेव तर्हि सद्रूपब्रह्मतादात्म्येनापि सत्प्रतीत्युपपत्त्या कथं वा सत्त्वासत्त्वोभयाभावलक्षणमिथ्यात्वस्य प्रत्यक्षेण अभावं गृहीतुं शक्यते।

तत्र च घटप्रतीतौ भासमानं सत्त्वं पटादौ च भासमानं सत्त्वमेकरूपतयाऽनुवर्तमानं सद्रुपब्रह्मणोऽनुगमेन वेति स्वीकर्तव्यम् इति ब्रह्मसाधारणं सद्रूपमेव घटादिकमपीति कल्पना न

युक्ता, सत्तातादात्म्यमेवात्र भासते इति न सद्रूपता, अवाध्यत्वं वा घटादिगतं ब्रह्म चैकम्। यदि चात्र सत्त्वमसत्त्वाभाव इत्युच्यते तत्रासत्त्वं च यदि सत्त्वाभावरूपं तर्हि सत्त्वासत्त्वयोः परस्परविरहत्वेन तु बाधितमेव। परन्तु क्वचिदुपाधौ सत्त्वेन प्रतीत्यनधिकरणत्वरूपासत्त्वाभावः सत्त्वमसत्त्वं तु बाध्यत्वरूपमिति वेदान्तशास्त्रे प्रतिपादितम्। एवञ्च सति सत्त्वाभावासत्त्वाभावरूपमिथ्यात्वस्य केवलबाध्यत्वरूपत्वाभावात्, उक्तविधसत्त्वाभावस्य क्वचिदुपाधौ सत्त्वेन प्रतीत्यधिकरणत्वस्य शुक्तिरूप्यादिसाधारणस्य मिथ्यात्वाविरोधित्वाच्च न प्रत्यक्षानुमानादीनां विरोधः। विरोधित्वे सति प्राबल्यं हि बाधकत्वे तन्त्रम्।

अपि सत्त्वासत्त्वयोः परस्परविरहरूपत्वेऽपि "सन् घट :" इति प्रत्यक्षं वर्तमान-कालिकमेवाबाधं विषयीकरोति न तु भाविबाधाभावम्, "अन्यथेदं रजतम्" इत्यादावपि सत्वावगाहिना प्रत्यक्षेण भावितदबाधावगाहनासम्भवात् रजतमिथ्यात्वमपि न सिद्ध्येत् स्वतःप्रामाण्यस्योभयत्र प्रतिभानदशायामविशेषात्। वस्तुतः "सन् घटः" इत्यधिष्ठानानुवेधमात्रम्। अत एव "सदेव सोम्येदमितिवद् बाधायामेव सामानाधिकरण्यम्, न तु नीलो घट इतिवत् विशेषणविशेष्यभावे। न हि घटसामान्यस्य नीलद्रव्यमधिष्ठानम्, परिणामित्वात् नीलद्रव्यस्य। तत्र तु कार्यकारणयोः समसत्ताकत्वात् कारणधर्मः कार्येऽपि वर्तत इति युक्तम्, अध्यारोपे तु कारणस्य कार्ये तादात्म्यमात्राध्यासः कार्यविषमसत्ताकत्वं चेति ज्ञेयम्। घटाद्यध्यासस्तु मूलाविद्यावशात् सृष्टिकालीनः पूर्वपूर्वसृष्टिक्रममनुसृत्यैव इति प्रवाहस्यानादित्वान्न अन्योन्याश्रयः।

तस्मान्न प्रत्यक्षेण प्रपञ्चसत्यत्वस्य सिद्धिर्भवितुमर्हति इति। एवञ्चानुमानेनापि प्रपञ्चस्य सत्यत्वसिद्धिर्न सम्भवति। यदुक्तं "विप्रतिपन्नम्, सत्यम्, प्रमाणदृष्टत्वात् शुद्धब्रह्मवदित्यनुमानेन प्रपञ्चस्य सत्यत्वसिद्धिर्भवति" इति नैतद्युक्तम्। तथाहि प्रमाणदृष्टत्वशब्देनात्र किं विवक्षितम् ? प्रमाणजन्यवृत्तिव्याप्यत्वं वा ? तादृशफलव्याप्यत्वं वा ? उभयं वा ? तदन्यद्वा ? अत्र च सर्वत्र वृत्तिपदेन प्रमाणजन्यज्ञानपदेन वाऽन्तःकरणवृत्तिर्विवक्ष्यते,उताविद्यावृत्तिः? अविद्यावृत्तिस्तु न प्रमाणजन्या। अन्तःकरणवृत्तिस्तु

नाप्रमाणजन्या, इति ज्ञानपदेन नान्तःकरणवृत्तिमात्रविवक्षायां प्रमाणपदं व्यर्थमिति व्यर्थविशेषणात् व्याप्यत्वासिद्धः, शुक्तिरूप्यव्यभिचारस्यापि तदेव करणात्। व्यर्थबहुविशेषणघटितहेतुरपि व्यपत्वासिद्धः। अन्तःकरणवृत्तिव्याप्यत्वमात्रविवक्षायामुपहितस्यैव वृत्तिविषयत्वम्। उपहितमात्रं विषयाविद्यानिवृत्तौ शुद्धं स्वयंप्रकाशमात्रमेव न वृत्तिविषय इति सिद्धान्ते दृष्टान्ते हेत्वसिद्धिः।

वृत्तिव्याप्यत्वञ्चात्र फलाव्याप्यावृत्तं विवक्ष्यते, तत्साधारणं वा। आद्ये स्वनिवर्त्याज्ञानसमानविषयत्वस्यैव वृत्तिव्याप्यत्वाद्धटादीनां चाविद्याविषयत्वाभावेनोक्त-वृत्तिव्याप्यत्वाभावात् भागासिद्धिश्च स्यादेव। फलव्याप्यत्वं गुरुत्वादौ अविद्यान्तःकरणादौ ब्रह्मणि च बाधितमिति भागासिद्धिहेत्वसिद्धिः।

अपि च वृत्तिव्याप्यत्वमात्रं न सत्त्वत्वप्रयोजकम्, अनध्यस्तत्वस्यैवाबाध्यता-प्रयोजकत्वादिदिति सर्वकल्पेषु, अप्रयोजकतासाक्षिभास्यानामविद्यान्तःकरणादीनां साक्षिणो वा प्रमाणजन्यज्ञानाविषयत्वाद्भागासिद्धिः दुर्वारा एव। तत्र वृत्तिस्वीकारपक्षेऽपि सा न प्रमाणाधीनेति वेदान्तसिद्धान्तः।

अपि च प्रमाणदृष्टत्वं यदि तात्त्विकप्रमाणदृष्टत्वं, तर्हि हेत्वसिद्धिः। परप्रक्रिययेति खलु परैरङ्गीकृतम्। अतात्त्विकप्रमादृष्टत्वं तु सिद्धान्तेऽसिद्धम्। उभयमपि शशशृङ्गादौ नास्ति इति व्यभिचारः। प्रत्यक्षादीनाञ्च तत्त्वावेदकत्वं पूर्वमेव निरस्तं श्रुतिविरुद्धत्वात्।

एतेन प्रपञ्चः तत्त्वावेदकप्रमादृष्टः, भ्रान्तेतरत्वादित्यादिप्रयोगोऽपि निराकृतः। अपि च भ्रान्तेतरत्वं यदि बाधितेतरत्वम्, तर्हि तत्प्रतीतिदशायां शुक्तिरूप्यादीनामपि इति तत्र व्यभिचारः। यदि कालत्रयेऽपि बाधितेतरत्वं ब्रह्मवत्, तर्हि हेत्वसिद्धिः, अधिष्ठानतत्त्व-साक्षात्कारेण त्रैकालिकबाधावगमात्। किञ्चात्मत्वोपाधिना सोपाधिकञ्च, यत्र यत्र तात्त्विकप्रमाणदृष्टत्वं, तत्र तत्र आत्मत्वं, पक्षे च सन्दिग्धोपाधिकत्वम, प्रपञ्चाबाध्यताया अद्यप्यसिद्धत्वात्। ब्रह्म तु न प्रमाणन्तरदृष्टम् इति हेत्वसिद्धस्तु पूर्वमेव प्रसाधिता चिद्रुपत्वोपाधितायां तात्पर्यात्। न च तदप्यबाध्यत्वम्, तदा हि हेतुरेवोपाधिरिति फलति। भ्रान्तेतरत्वमात्मत्वं चानर्थान्तरमिति हेत्वसिद्धिरेव दूषणम्। “नेह नानास्ति किञ्चन” इति श्रुतिबाध्यत्वेनाबाध्यत्वस्य पक्षेऽसम्भवात्। आत्मत्वं हि अत्रोपाधितया

विवक्षितमात्मस्वरूपमात्रत्वम्, अबाधितत्वोपलक्षितस्वरूपत्वम्, तस्यैव आत्मत्वात्। न च तादृशमात्मत्वं पक्षे वर्तते। निर्धर्मकत्वाद् ब्रह्मणः आत्मत्वरूपधर्माभावो न दोषाय अबाधितत्वोपलक्षितचिन्मात्रस्यैव निर्विशेषब्रह्मस्वरूपत्वात्। एवं प्रपञ्चमिथ्याप्रमाणदृष्टत्वादिति सत्प्रतिपक्षोऽप्यत्रानुसन्धेयः।

एतेन "प्रपञ्चसत्य:" अर्थक्रियाकारित्वादात्मवदित्यपि निरस्तम्, दृष्टान्तासम्प्रतिपत्तेः। न सम्प्रतिपन्नं किमप्यस्ति। अत्रानुमाने आत्मा दृष्टान्तत्वेन गृहीतोऽपि। स च यदि शुद्धं ब्रह्म तर्हि न तस्यार्थक्रियाकारित्वम्। श्रुतिसिद्धं जगत् कारणं न तु शुद्धम्, किन्तु मायोपहितमेव, तस्य तु पक्षकोटिनिक्षिप्तत्वान्न दृष्टान्तः, दृष्टान्तस्तु शुद्धं ब्रह्म, तच्च नार्थक्रियाकारि।

तच्चार्थक्रियाकारित्वं यदि व्यावहारिकम्, तर्हि तद्व्यवहारातीते तत्र बाधितम् इति तत्र दुष्परिहारा हेत्वसिद्धिः। शुक्तिरूप्यादीनामप्यर्थक्रियाकरित्वात् तत्र व्यभिचारः। अपि च प्रपञ्चः मिथ्या अर्थक्रियाकारित्वात् शुक्तिरूप्यवदिति विरोधोऽप्यनुसन्धेय एव। अत एव नानुमानेनापि प्रपञ्चस्य सत्यत्वसिद्धिः। एवमागमप्रमाणेनापि प्रपञ्चस्य सत्यत्वं न सिद्ध्यति। यदुक्तम्- "विश्वं सत्यं मघवाना" इत्यादिभिः श्रुतिभिः प्रपञ्चस्य सत्यत्वमेव इति तन्न समीचीनम्।

तथाहि "विश्वं सत्यं मघवनाम्" इति वाक्यं मघवत्स्तुतिपरं न प्रपञ्चमिथ्यात्वनिषेधे सत्यत्वसाधने वा समर्थम्, स्वार्थेऽतात्पर्यात्। अत एव "आपश्चन प्रमिणन्ती"त्यत्र देवतादृष्ट्यैव प्रामाणिकत्वम्, न वस्तुगत्या इति व्यावहारिकप्रामाण्यमेव सा समर्थयति। तथाहि विश्वं सत्यं मधवानायुवयोरिदापश्च न प्रमिणन्ति व्रतवाम्। अच्छेन्द्राब्रह्मणस्यती हवीर्नो अन्नं युजेव वाजिना जिगातम्"[1] इति ऋक्संहिताद्वितीयाष्टकवाक्यस्यायमेवार्थ: "हे इन्द्र! ब्रह्मणस्पती ! मघवाना मघवानौ मघमिति घनानां घनवन्तौ, मघवन्तौ वेति"। विश्वं सर्वं सत्यं कर्म, सद्भूतत्वात्, फलस्यावश्यम्भावित्वाद्वा तादृशं कर्म, युवयोरिति युवयो इति इत्थम् अवधारणे वा। युवामेवोद्दिश्य सर्वाणि कर्माणि अनुष्ठेयानीत्यर्थ:। आपो व्यापनशीलादेवताः च न इत्येतत्पक्षद्वयसमुदाय:, ऐकपद्यं त्वध्यापकसम्प्रदायसिद्धम्। वा युवयोर्व्रतम, संकल्पं कर्म वा न प्रमिणन्ति न हि सन्ति (मीङ् हिंसायां क्रैयादिकः) किन्तु अनुमोदन्ते इति यावत्। नोऽस्माकं हविर्दध्यादिकमन्नं च पुरोडाशादिकं च अच्छ अभिलक्ष्य वाजिना वेगवन्तौ

[1] ऋ.सं. - 2/7/3/12

अश्वाविव। युजायुक्तौ सन्तौ जिगातम्- देव यजनमागच्छतम्, अन्नं घातं प्रति अश्वाविवेति वा। यद्वा -“ हे इन्द्र ! ब्रह्मणस्पती ! विश्वं सत्येन परिदृश्यमानं जगत् युवयोरित युवयोरेव, युवाभ्यामेव सृष्टमथवा युवयोरेव विश्वं सर्वं स्तोतं सत्यं यथार्थम्।

एवञ्च अस्य मन्त्रस्य स्तुतिपरतया न प्रपञ्चसत्यत्वे तात्पर्यम्। एवञ्च “यच्चिकेत सत्यमित् तन्न इति मन्त्रेणापि प्रपञ्चसत्यत्वं न प्रतिपादयितुं शक्यते। तथाहि –

**"शाक्मनाशाको अरुणः सुपर्ण आयोमहः शूरः सनादशीलः।**

**यच्चिकेत सत्यमित् तन्नमोघं वसुस्पार्हमुत जेतोत जाता।।"**[2]

इति मन्त्रस्येन्द्रस्तुतिपरतया न प्रपञ्चसत्यत्वे तात्पर्यम्। अस्य मन्त्रस्यायमर्थः - शाक्मना शाकैव शाक्मा तेन शाक्मना बलेन। शाकः शक्तः, स्वशक्त्यैव सर्वं शक्त इत्यर्थः। न हीन्द्रस्य सहायान्तरापेक्षाऽस्ति, इन्द्रत्वादेव अरुणः अरुणवर्णः कश्चित् शोभनवर्णः पक्षी आगच्छतीति अध्याहार : उपसर्गश्रुतेः। यो महोमहान्शूरः विक्रान्तः सनात्पुराणः, अनील, अनीडः, नीडस्याकर्त्ता। न हि इन्द्रोऽग्निवत् कुत्रचिदपि यज्ञे निकेतनं करोति एवं सुपर्ण इत्यादिरूपकेणेन्द्रमाह- स इन्द्र इदमिदानी कर्तव्यमिति यच्चिकेत जानाति, तत्सत्यमित्सत्यमेव न मोघं न व्यर्थम्। स्मार्तं स्पृहणीयं वस्तु निवासार्हं धनं जेता जयति शत्रुभ्यः सकाशादुतापि, दाता ददाति च स्तोतृभ्यः। एवञ्चास्य मन्त्रस्येन्द्रस्तुतिपरतया न विश्वस्य सत्येव तात्पर्यम्। एवं “याथातथ्यतोऽर्थान् व्यदधात्" इत्यादिवाक्यमपि न प्रपञ्चसत्यत्वे प्रमाणम्। एतस्य हि पूर्वसृष्टप्रकारेण सर्जनमर्थः न तु जगत्सत्यत्वं जगतसर्जनगतसत्यत्वं वा। यत्र स्तुत्यादिपरत्वं नास्ति तत्रापि प्रत्यक्षसिद्धस्यानुवादकतया “अग्निर्हिमस्य भेषजमित्यादिवाक्यवत्सत्यत्वप्रतिपादकपरत्वम् इति।

सृष्टिश्रुतिरपि व्यावहारिकसत्त्वम् अभिप्रेत्यैव प्रवर्तते। विवर्तोपादानतोपपादकता-परत्वात् सृष्टादिश्रुतीनाम्, अतो लोकसिद्धाध्यारोपनिबन्धनसत्तातादात्म्यमभिप्रेत्यैव “विश्वं सत्यमित्थ्यादिश्रुतयः"। प्रत्यक्षसिद्धभेदसत्यत्वानुवादरूपावेति न प्रपञ्चसत्यत्वसाधने मिथ्यात्वबाधने वा क्षमाः।

[2] ऋ.सं. - 8/1/17

"सन घटः" इत्यादि तदेव रूप्यं सदिति सत्तायाः प्रत्यक्षसिद्धत्वेऽपि शुक्तिरूप्यसत्त्वं प्रातिभासिकं व्यवहारकाल एव बाध्यमानत्वात् घटादिसत्त्वं तु व्यावहारिकं, व्यवहारकालाबाधितत्वात्, इति प्रपञ्चस्य प्रातिभासिकव्यावहारिकसत्त्वव्यवस्था।

- **.ग्रन्थः/ग्रन्थकर्ता/सम्पादकः/व्याख्याकारः/प्रकाशनसंस्था/वर्षः-**


  - ब्रह्मसूत्रशाङ्करभाष्यम्- शङ्करभगवत्पादः, आचार्यजगदीश्शास्त्री, मोतीलाल बनारसीदास, वाराणसी, चौखम्बा, १९९६।
  - श्रीमद्भगवद्गीताशाङ्करभाष्यम्- गीताप्रेस्, गोरखपुरम्।
  - ऋक्संहिता
  - ब्रह्मसूत्रगोविन्दभाष्यम्- बलदेवविद्याभूषणः।